**DIVINEECHOVIBRATIONS**

# दस महाविद्या स्तोत्र

॥ 1 ॥

**श्लोक**

**नमस्ते चण्डिके । चण्डि । चण्ड-मुण्ड-विनाशिनि ।**
**नमस्ते कालिके । काल-महा-भय-विनाशिनी ॥**

---

॥ 2 ॥

**श्लोक**

**शिवे । रक्ष जगद्धात्रि । प्रसीद हरि-वल्लभे ।**
**प्रणमामि जगद्धात्रीं, जगत्-पालन-कारिणीम् ॥**

---

॥ 3 ॥

**श्लोक**

**जगत्-क्षोभ-करीं विद्यां, जगत्-सृष्टि-विधायिनीम् ।**
**करालां विकटा घोरां, मुण्ड-माला-विभूषिताम् ॥**

---

॥ 4 ॥

**श्लोक**

**हरार्चितां हराराध्यां, नमामि हर-वल्लभाम् ।**
**गौरीं गुरु-प्रियां**

---

॥ 5 ॥

**श्लोक**

**हरि-प्रियां महा-मायां, नमामि ब्रहम-पूजिताम् ।**
**सिद्धां सिद्धेश्वरीं सिद्ध-विद्या-धर-गणैर्युताम् ॥**

---

॥ 6 ॥

**श्लोक**

**मन्त्र-सिद्धि-प्रदां योनि-सिद्धिदां लिंग-शोभिताम् ।**
**प्रणमामि महा-मायां, दुर्गा दुर्गति-नाशिनीम् ॥**

---

**॥ 7 ॥**

**श्लोक**

**उग्रामुग्रमयीमुग्र-तारामुग्र-गणैर्युताम् ।**
**नीलां नील-घन-श्यामां, नमामि नील-सुन्दरीम् ॥**

---

**॥ 8 ॥**

**श्लोक**

**श्यामांगीं श्याम-घटिकां, श्याम-वर्ण-विभूषिताम् ।**
**प्रणामामि जगद्धात्रीं, गौरीं सर्वार्थ-साधिनीम् ॥**

---

**॥ 9 ॥**

**श्लोक**

**विश्वेश्वरीं महा-घोरां, विकटां घोर-नादिनीम् ।**
**आद्यामाद्य-गुरोराद्यामाद्यानाथ-प्रपूजिताम् ॥**

---

**॥ 10 ॥**

**श्लोक**

**श्रीदुर्गां धनदामन्न-पूर्णां पद्मां सुरेश्वरीम् ।**
**प्रणमामि जगद्धात्रीं, चन्द्र-शेखर-वल्लभाम् ॥**

---

**॥ 11 ॥**

**श्लोक**

**त्रिपुरा-सुन्दरीं बालामबला-गण-भूषिताम् ।**
**शिवदूतीं शिवाराध्यां, शिव-ध्येयां सनातनीम् ॥**

---

**॥ 12 ॥**

श्लोक

सुन्दरीं तारिणीं सर्व-शिवा-गण-विभूषिताम् ।
नारायणीं विष्णु-पूज्यां, ब्रह्म-विष्णु-हर-प्रियाम् ॥

---

॥ 13 ॥

श्लोक

सर्व-सिद्धि-प्रदां नित्यामनित्य-गण-वर्जिताम् ।
सगुणां निर्गुणां ध्येयामर्चितां सर्व-सिद्धिदाम् ॥

---

॥ 14 ॥

श्लोक

विद्यां सिद्धि-प्रदां विद्यां, महा-विद्या-महेश्वरीम् ।
महेश-भक्तां माहेशीं, महा-काल-प्रपूजिताम् ॥

---

॥ 15 ॥

श्लोक

प्रणमामि जगद्धात्रीं, शुम्भासुर-विमर्दिनीम् ।
रक्त-प्रियां रक्त-

---

॥ 16 ॥

श्लोक

भैरवीं भुवना-देवीं, लोल-जिह्वां सुरेश्वरीम् ।
चतुर्भुजां दश-भुजामष्टा-दश-भुजां शुभाम् ॥

---

॥ 17 ॥

श्लोक

त्रिपुरेशीं विश्व-नाथ-प्रियां विश्वेश्वरीं शिवाम् ।
अट्टहासामट्टहास-प्रियां धूम्र-विनाशिनीम् ॥

---

॥ 18 ॥

**श्लोक**

**कमलां छिन्न-मस्तां च, मातंगीं सुर-सुन्दरीम् ।**
**षोडशीं विजयां भीमां, धूम्रां च बगलामुखीम् ॥**

---

**॥ 19 ॥**

**श्लोक**

**सर्व-सिद्धि-प्रदां सर्व-विद्या-मन्त्र-विशोधिनीम् ।**
**प्रणमामि जगत्तारां, सारं मन्त्र-सिद्धये ॥**

*|| श्रीमुण्ड-माला-तन्त्रे एकादश-पटले महा-विद्या-स्तोत्रम् ||*